# Shri Dharmashastuh Ashtottarashatanama Stotram

# શ્રીધર્મશાસ્તુઃ અષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : dharmashaastuH aShTottarashatanaamastotraM

File name : dharmashaastaa108stotra.itx

Category : aShTottarashatanAma, deities_misc, ayyappa, stotra

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીધર્મશાસ્તુઃ અષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીપૂર્ણાપુષ્કલામ્બાસમેત શ્રીહરિહરપુત્રસ્વામિને નમઃ ॥

ધ્યાનમ્ -
કલ્હારોજ્જ્વલ નીલકુન્તલભરં કાલામ્બુદ શ્યામલં
કર્પૂરાકલિતાભિરામવપુષં કુન્દેન્દુબિમ્બાનનમ્ ।
શ્રીદણ્ડાઙ્કુશ-પાશ-શૂલ-વિલસત્પાણિં મદાન્ત-
દ્વિપારૂઢં શત્રુવિમર્દનં હૃદિ મહાશાસ્તારમાદ્યં ભજે ॥

ૐ મહાશાસ્તા મહાદેવો મહાદેવસુતોઽવ્યયઃ ।
લોકકર્તા લોકભર્તા લોકહર્તાપરાત્પરઃ ॥ ૧॥

ત્રિલોકરક્ષકો ધન્વી તપસ્વી ભૂતસૈનિકઃ ।
મન્ત્રવેદી મહાવેદી મારુતો જગદીશ્વરઃ ॥ ૨॥

લોકાધ્યક્ષોઽગ્રણીઃ શ્રીમાનપ્રમેયપરાક્રમઃ ।
સિમ્હારૂઢો ગજારૂઢો હયારૂઢો મહેશ્વરઃ ॥ ૩॥

નાનાશસ્ત્રધરોઽનર્ઘો નાનાવિદ્યાવિશારદઃ ।
નાનારૂપધરો વીરો નાનાપ્રાણિનિષેવિતઃ ॥ ૪॥

ભૂતેશો ભૂતિદો ભૃત્યો ભુજઙ્ગાભરણોજ્જ્વલઃ ।
ઇક્ષુધન્વી પુષ્પબાણો મહારૂપો મહાપ્રભુઃ ॥ ૫॥

માયાદેવીસુતો માન્યો મહનીયો મહાગુણઃ ।
મહાશૈવો મહારુદ્રો વૈષ્ણવો વિષ્ણુપૂજકઃ ॥ ૬॥

વિઘ્નેશો વીરભદ્રેશો ભૈરવો ષણ્મુખપ્રિયઃ ।
મેરુશૃઙ્ગસમાસીનો મુનિસઙ્ઘનિષેવિતઃ ॥ ૭॥

વેદો ભદ્રો જગન્નાથો ગણનાથો ગણેશ્વરઃ ।
મહાયોગી મહામાયી મહાજ્ઞાની મહાસ્થિરઃ ॥ ૮॥

વેદશાસ્તા ભૂતશાસ્તા ભીમહાસપરાક્રમઃ ।
નાગહારો નાગકેશો વ્યોમકેશઃ સનાતનઃ ॥ ૯॥

સગુણો નિર્ગુણો નિત્યો નિત્યતૃપ્તો નિરાશ્રયઃ ।
લોકાશ્રયો ગણાધીશશ્ચતુષ્ષષ્ટિકલામયઃ ॥ ૧૦॥

ઋગ્યજુઃસામાથર્વાત્મા મલ્લકાસુરભઞ્જનઃ ।
ત્રિમૂર્તિર્દૈત્યમથનઃ પ્રકૃતિઃ પુરુષોત્તમઃ ॥ ૧૧॥

કાલજ્ઞાની મહાજ્ઞાની કામદઃ કમલેક્ષણઃ ।
કલ્પવૃક્ષો મહાવૃક્ષો વિદ્યાવૃક્ષો વિભૂતિદઃ ॥ ૧૨॥

સંસારતાપવિચ્છેત્તા પશુલોકભયઙ્કરઃ ।
રોગહન્તા પ્રાણદાતા પરગર્વવિભઞ્જનઃ ॥ ૧૩॥

સર્વશાસ્ત્રાર્થ તત્ત્વજ્ઞો નીતિમાન્ પાપભઞ્જનઃ ।
પુષ્કલાપૂર્ણાસંયુક્તઃ પરમાત્મા સતાઙ્ગતિઃ ॥ ૧૪॥

અનન્તાદિત્યસઙ્કાશઃ સુબ્રહ્મણ્યાનુજો બલી ।
ભક્તાનુકમ્પી દેવેશો ભગવાન્ ભક્તવત્સલઃ ॥

ઇતિ શ્રીધર્મશાસ્તુઃ અષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Antaratma antaratma at Safe-mail.net
Proofread by Antaratma, PSA Easwaran

*Shri Dharmashastuh Ashtottarashatanama Stotram*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*